# shivakailAsAShTottarashatanAmAvaliH

# श्रीशिवकैलासाष्टोत्तरशतनामावलिः

## Document Information

Text title : Mahakailasa or Kameshvara Ashtottarashata Namavali 108 Names

File name : mahAkailAsa108.itx

Category : aShTottarashatanAmAvalI, shiva, nAmAvalI

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : July 9, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2023

*sanskritdocuments.org*

# श्रीशिवकैलासाष्टोत्तरशतनामावलिः

ॐ श्रीमहाकैलासशिखरनिलयाय नमो नमः ।
ॐ हिमाचलेन्द्रतनयावल्लभाय नमो नमः ।
ॐ वामभागकलत्रार्धशरीराय नमो नमः ।
ॐ विलसद्दिव्यकर्पूरदिव्याभाय नमो नमः ।
ॐ कोटिकन्दर्पसदृशलावण्याय नमो नमः । ५।
ॐ रत्नमौक्तिकवैडूर्यकिरीटाय नमो नमः ।
ॐ मंदाकिनीजलोपेतमूर्धजाय नमो नमः ।
ॐ चारुशीतांशुशकलशेखराय नमो नमः ।
ॐ त्रिपुण्ड्रभस्मविलसत्भालकाय नमो नमः ।
ॐ सोमपावकमार्ताण्डलोचनाय नमो नमः । १०
ॐ वासुकीतक्षकलसत्कुण्डलाय नमो नमः ।
ॐ चारुप्रसन्नसुस्मेरवदनाय नमो नमः ।
ॐ समुद्रोद्भूतगरलकंधराय नमो नमः ।
ॐ कुरंगविलसत्पाणिकमलाय नमो नमः ।
ॐ परश्वधद्वयलसद्दिव्यकराब्जाय नमो नमः । १५।
ॐ वराभयप्रदकरयुगलाय नमो नमः ।
ॐ अनेकरत्नमाणिक्यसुहाराय नमो नमः ।
ॐ मौक्तिकस्वर्णरुद्राक्षमालिकाय नमो नमः ।
ॐ हिरण्यकिंकिणीयुक्तकंकणाय नमो नमः ।
ॐ मंदारमल्लिकादामभूषिताय नमो नमः । २०
ॐ महामातंगसत्कृत्तिवसनाय नमो नमः ।
ॐ नागेंद्रयज्ञोपवीतशोभिताय नमो नमः ।
ॐ सौदामिनीसमच्छायसुवस्त्राय नमो नमः ।
ॐ सिंजानमणिमंजीरचरणाय नमो नमः ।
ॐ चक्राब्जध्वजयुक्तांघ्रिसरोजाय नमो नमः । २५।

ॐ अपर्णाकुचकस्तूरीशोभिताय नमो नमः ।
ॐ गुहमत्तेभवदनजनकाय नमो नमः ।
ॐ बिडौजोविधिवैकुण्ठसन्नुताय नमो नमः ।
ॐ कमलाभारतींद्राणीसेविताय नमो नमः ।
ॐ महापंचाक्षरीमन्त्रस्वरूपाय नमो नमः । ३०
ॐ सहस्रकोटितपनसंकाशाय नमो नमः ।
ॐ अनेककोटिशीतंशुप्रकाशाय नमो नमः ।
ॐ कैलासतुल्यवृषभवाहनाय नमो नमः ।
ॐ नंदीभृंगीमुखानेकसंस्तुताय नमो नमः ।
ॐ निजपादांबुजासक्तसुलभाय नमो नमः । ३५।
ॐ प्रारब्धजन्ममरणमोचनाय नमो नमः ।
ॐ संसारमयदुःखौघभेषजाय नमो नमः ।
ॐ चराचरस्थूलसूक्ष्मकल्पकाय नमो नमः ।
ॐ ब्रह्मादिकीटपर्यन्तव्यापकाय  नमो नमः ।
ॐ सर्वसहामहाचक्रस्यन्दनाय नमो नमः । ४०
ॐ सुधाकरजगच्छक्षूरथांगाय नमो नमः ।
ॐ अथर्वऋग्यजुस्सामतुरगाय नमो नमः ।
ॐ सरसीरुहसंजातप्राप्तसारथये नमो नमः ।
ॐ वैकुण्ठसायविलसत्सायकाय नमो नमः ।
ॐ चामीकरमहाशैलकार्मुकाय नमो नमः । ४५।
ॐ भुजंगराजविलसत्सिञ्जिनीकृतये नमो नमः ।
ॐ निजाक्षिजाग्निसन्दग्ध त्रिपुराय नमो नमः ।
ॐ जलंधरासुरशिरच्छेदनाय नमो नमः ।
ॐ मुरारिनेत्रपूजांघ्रिपंकजाय नमो नमः ।
ॐ सहस्रभानुसंकाशचक्रदाय नमो नमः । ५०
ॐ कृतान्तकमहादर्पनाशनाय नमो नमः ।
ॐ मार्कण्डेयमनोभीष्टदायकाय नमो नमः ।
ॐ समस्तलोकगीर्वाणशरण्याय नमो नमः ।
ॐ अतिज्वलज्वालामालविषघ्नाय नमो नमः ।
ॐ शिक्षितांधकदैतेयविक्रमाय नमो नमः । ५५।
ॐ स्वद्रोहिदक्षसवनविघाताय नमो नमः ।
ॐ शंबरांतकलावण्यदेहसंहारिणे नमो नमः ।

ॐ रतिप्रार्तितमांगल्यफलदाय नमो नमः ।
ॐ सनकादिसमायुक्तदक्षिणामूर्तये नमो नमः ।
ॐ घोरापस्मारदनुजमर्दनाय नमो नमः । ६०
ॐ अनन्तवेदवेदान्तवेद्याय नमो नमः ।
ॐ नासाग्रन्यस्तनिटिलनयनाय नमो नमः ।
ॐ उपमन्युमहामोहभंजनाय नमो नमः ।
ॐ केशवब्रह्मसंग्रामनिवाराय नमो नमः ।
ॐ द्रुहिणांभोजनयनदुर्लभाय नमो नमः । ६५।
ॐ धर्मार्थकामकैवल्यसूचकाय नमो नमः ।
ॐ उत्पत्तिस्थितिसंहारकारणाय नमो नमः ।
ॐ अनन्तकोटिब्रह्माण्डनायकाय नमो नमः ।
ॐ कोलाहलमहोदारशमनाय नमो नमः ।
ॐ नारसिंहमहाकोपशरभाय नमो नमः । ७०
ॐ प्रपंचनाशकल्पान्तभैरवाय नमो नमः ।
ॐ हिरण्यगर्भोत्तमांगच्छेदनाय नमो नमः ।
ॐ पतंजलिव्याघ्रपादसन्नुताय नमो नमः ।
ॐ महाताण्डवचातुर्यपंडिताय नमो नमः ।
ॐ विमलप्रणवाकारमध्यगाय नमो नमः । ७५।
ॐ महापातकतूलौघपावनाय नमो नमः ।
ॐ चंडीशदोषविच्छेदप्रवीणाय नमो नमः ।
ॐ रजस्तमस्सत्त्वगुणगणेशाय नमो नमः ।
ॐ दारुकावनमानस्त्रीमोहनाय नमो नमः ।
ॐ शाश्वतैश्वर्यसहितविभवाय नमो नमः । ८०
ॐ अप्राकृतमहादिव्यवपुस्थाय नमो नमः ।
ॐ अखंडसच्चिदानन्दविग्रहाय नमो नमः ।
ॐ अशेषदेवताराध्यपादुकाय नमो नमः ।
ॐ ब्रह्मादिसकलदेववन्दिताय नमो नमः ।
ॐ पृथिव्यप्तेजोवाय्वाकाशतुरीयाय नमो नमः । ८५।
ॐ वसुन्धरमहाभारसूदनाय नमो नमः ।
ॐ देवकीसुतकौन्तेयवरदाय नमो नमः ।
ॐ अज्ञानतिमिरध्वान्तभास्कराय नमो नमः ।
ॐ अद्वैतानन्दविज्ञानसुखदाय नमो नमः ।

ॐ अविद्योपाधिरहितनिर्गुणाय नमो नमः । ९०
ॐ सप्तकोटिमहामन्त्रपूरिताय नमो नमः ।
ॐ गंधशब्दस्पर्शरूपसाधकाय नमो नमः ।
ॐ अक्षराक्षरकूटस्थपरमाय नमो नमः ।
ॐ षोडशाब्दवयोपेतदिव्यांगाय नमो नमः ।
ॐ सहस्रारमहापद्ममण्डिताय नमो नमः । ९५।
ॐ अनन्तानन्दबोधांबुनिधिस्थाय नमो नमः ।
ॐ अकारादिक्षकारान्तवर्णस्थाय नमो नमः ।
ॐ निस्तुलौदार्यसौभाग्यप्रमत्ताय नमो नमः ।
ॐ कैवल्यपरमानन्दनियोगाय नमो नमः ।
ॐ हिरण्यज्योतिविभ्राजत्सुप्रभाय नमो नमः । १००
ॐ ज्योतिषांमूर्तिमज्योतिरूपदाय नमो नमः ।
ॐ अनौपम्यमहासौख्यपदस्थाय नमो नमः ।
ॐ अचिंत्यमहिमाशक्तिरंजिताय नमो नमः ।
ॐ अनित्यदेहविभ्रांतिवर्जिताय नमो नमः ।
ॐ सकृत्प्रपन्नदौर्भाग्यच्छेदनाय नमो नमः ।
ॐ षट्त्रिंशत्तत्त्वप्रशादभुवनाय नमो नमः ।
ॐ आदिमध्यान्तरहितदेहस्थाय नमो नमः ।
ॐ परानन्दस्वरूपार्थप्रबोधाय नमो नमः ।
ॐ ज्ञानशक्तिकृयाशक्तिसहिताय नमो नमः ।
ॐ पराशक्तिसमायुक्तपरेशाय नमो नमः । ११०
ॐ ओंकारानन्दनोद्यानकल्पकाय नमो नमः ।
ॐ ब्रह्मादिसकलदेववन्दिताय नमो नमः । ११२

॥ श्री महाकैलासाष्टोत्तरशतनामावलिः संपूर्णा ॥

कामेश्वराष्टोत्तरशतनामावलिः च
अथवा शिवरहस्योक्त शिवाष्टोत्तरशतनामावली ।

Endoded by N. Balasubramanian bbalu@satyam.net.in

*shivakailAsAShTottarashatanAmAvaliH*

pdf was typeset on December 19, 2023

Please send corrections to *sanskrit@cheerful.com*